International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 125-129
© 2026 IJMH
www.themultijournal.com
Received: 07-02-2026
Accepted: 21-02-2026
Publish : 23-02-2026

**सीतांशुरंजनदाशः**
अतिथ्यध्यापकः,
संस्कृतविभागः.
रेभेन्साविश्वविद्यालयः,
कटकम्, उत्कलः

**Correspondence:**
**सीतांशुरंजनदाशः**
अतिथ्यध्यापकः,
संस्कृतविभागः.
रेभेन्साविश्वविद्यालयः,
कटकम्, उत्कलः

# नैयायिकमीमांसकमतनिराकरणपूर्वकं वैयाकरणमतानुसारं शाब्दबोधवर्णनम् :

**सीतांशुरंजनदाशः**

शब्दजन्यबोधः स च वाक्यस्य-पदार्थानां तत्तसम्बन्धमाध्यमेन परस्परान्वयपूर्वकं महावाक्यार्थबोधाज्जायतो प्रायशो वाक्यस्य सुबन्ततिङन्तसमुदायमूलकत्वेन तत्तद्वाक्यघटक तत्तसुबन्ततिङन्तपदार्थान्वयमाध्यमेन जायमानो महावाक्यार्थ एव शाब्दबोध इति नाम्ना पदवाक्यप्रमाणदर्शनेषु व्यपदिश्यते। एतादृशशाब्दबोधविषयकज्ञानसम्पादनाय तत्तत्पद्वाक्यघटकपदपदार्थज्ञानमप्यत्यावश्यकं भवति। तत्तद्वाक्यघटकतत्तत्पदार्थेभ्यः फलव्यापायोधर्मो, सङ्ख्याकालो इत्येते पदार्थांशशाब्दबोधजननायोपकुर्वन्तीयत् पदवाक्यप्रमाण विना कस्यापि विप्रतिपत्तिः । परन्तु तव कस्यार्यस्य को वाचकशशब्दः इत्यसैव सर्वे नव्यनैयायिकमीमांसकादयो विवदन्ते । तद्यथा धातोः फलव्यापारयोः पृथक्शक्तिः स्वीकर्तव्या । तथाच फलव्यापारवुभौ धात्वर्थौ भवतः । उक्तञ्च ' वैयाकरणभूषणसरे- “फलव्यापारयोर्धातुः”[1] इति । कर्त्तार्कर्मसंख्याकालाः तिङर्थाः । तव फलस्थानुकूलतसम्बन्धेन धात्वर्थ व्यापारेऽन्वयः । आख्यातार्थस्य कर्तुर्धात्वर्थव्यापारेऽन्वयः । आख्यातार्थस्य कर्मणो धात्वर्यफलेऽन्वयः । आख्यातार्थसङ्ख्यायाः आख्यातार्थकर्तृकर्मणोरभेदेनान्वयः । आख्यातार्थकालस्य धात्वर्थव्यापारेऽन्वयः । तथाच “चौत्रस्तण्डुलं पचति" इत्यादिकर्त्तृलकारस्थले एकत्वविशिष्टचैत्रस्तणडुलकर्मकाविक्लित्यनुकूलो वर्तमानकालावच्छिन्नो व्यापार इति वैयाकरणमते शाब्दबौधः फलति । देवदत्तादिपदप्रयोगे “देवत्तो ग्रामं गच्छति ” इत्यादौ देवदत्ताभिन्नाकर्त्तृकः एकत्वविशिष्टो ग्रामकर्मकः पूर्वदेशविभागानुकूलः अन्यदेशसंयोगानुकूलो व्यापार : इति शाब्दबोधः फलति । घटो नश्यति इत्यत्र कर्तरि लकारस्थले घटाभिन्नाकर्त्तृकः एकत्वसङ्ख्याविशिष्टः नाशानुकूलव्यापारः इति शब्दबोधः फलति । देवदत्त जानाति, देवदत्तः इच्छति इत्यादौ एकत्वसङ्ख्याविशिष्टो देवदत्राभिन्नाभ्रयको ज्ञानेच्छाद्यनुकूलो वर्तमानकालावाच्छिन्नो व्यापार : इति वैयाकरणमते शाब्दबोधः फलति । स्पष्टञ्चेदत्कौण्डभट्टेन' [2] वैयाकरणभूषणसारे ।

प्राचीनवैयाकरणमतानुसारं कर्त्तरि लकारे धात्वाख्यातार्थविषयकशाब्दबोधवर्णनम् । एतावता प्रबन्धेन प्राचीनवैयाकरणमतानुसारं धातोः फलव्यापारयोरर्थयोः पृथगेव शक्तिस्स्वीकार्या। तन्मते चैत्रः तण्डुलं पचतीत्यादौ फलस्य विक्लित्यादेरनुकूलतासम्बन्धेन पार्थक्येनैवात्र व्यापारे अन्वयो भवति। तन्मतानुसारं धातोः पार्यक्येन फलव्यापारौ द्वावर्थौ भवतः । चैत्रस्तण्डलं पचति इत्यादौ कर्तरि लकारे धातोः फलव्यापारोभयोरर्थकत्वेऽपि एकत्व सङ्ख्यावित्श्चैत्राभिन्नकर्तृको विक्लित्यनुकूलो वर्तमानकालावच्छिन्नव्यापार इत्याकारको धात्वर्थव्यापारविशेष्यकशाब्दबीधो जायते ।

**प्राचीनवैयाकरणमतनिकारणपूर्वकं नव्यवैयाकिरणमतरीत्या धात्वाख्यातार्थविषयक-शाब्दबौधवर्णनम् -**

वस्तुतस्तु धात्वर्थविषयकशाब्दबोधनिरूपणावसरे कस्यैव पचादिधातोः फलव्यपारयोः उभयोः पार्थक्येनार्थद्वये शक्ति- स्वीकारे फलस्योद्देश्यविधेयभावसम्बन्धेन धात्वर्थव्यापारे अन्वयापत्तिः स्यात् । पृथगुपस्थित्युदेश्यविधेयपदार्थयोरुदेश्यविधेयभावेनान्वयस्यौत्सर्गिकत्वात्। किञ्चैकस्यैव पचादिधातोरर्थद्वयकल्पने तथा व्युत्पत्तिद्वयकल्पने चातिगौरवम् । तथाहि चैत्रः तण्डुलं पचति इत्यादिकर्त्तृ लकारस्थले तत्तत्कर्तृकतत्तद्धापार विषयकाशाब्दबोधजननाय फलविशेषणकव्यापारबोधे कर्त्तृप्रत्यय समभिव्याहृतधार्तुजन्योपस्थितिः कारणम् धातोः । फलव्यापारविषयककार्यद्वये शक्तिद्वयकल्पनम्, तथा

कार्यकारणाभावद्वयकल्पनम्, धातोर्वोजिनकत्वसम्बन्धद्वय- कल्पनमित्येवं रीत्या धातोः पृथक्तया फलव्यापारोभयार्थबोधकत्वादिनां प्राचीनवैयाकरणानामतिगौरवम्। निल्कर्षे तु चैत्रस्तण्डुलं पचतीत्यादौ पचादिधातोः फलावाच्छिन्नव्यापारे, तथा च पच्यते तण्डुलश्चैत्रेण इत्यादिप्रयोगस्थले पचादिधातोः व्यापारवाच्छिन्नफले एव शक्ति स्वीकार्यति नव्यवैयाकरणधुरीणां नागेशादीनां चरमसिद्धान्तः। प्रपञ्चितश्चैतद्वैयाकरणनागेशेन स्वप्रणीते परमलघुमञ्जूषाग्रन्थे ।

**प्राचीनमीमांसकमतानुसारं धात्वाख्यातार्थविषयकशाब्दबोधवर्णनम्–**

चैत्रस्तण्डुलं पचति इत्यादौ विक्लित्यादिफलमेव धात्वर्थः । तदनुकूलः फुत्कारादिशरीर व्यापारस्तदनुकूलो यत्नश्च सर्वोऽपि व्यापारो व्यापारत्वेनाख्यातार्थ एव, नतु धात्वर्थः । अत एव व्यापारस्य फलापेक्षया प्राधान्यं सिद्धयति । अन्यथा तस्य प्रधान्यं न स्यात्। तथा चेत् "प्रकृतिप्रत्ययौ सहैवार्थं ब्रुतस्तयोः प्रत्ययार्थः प्रधानम्"[3] इति न्यायविरोधापत्तेः । किञ्च पचतीत्यादावाख्यात श्रवणे भावनायाः प्रतीत्या, पाकः इत्यादावाख्याताश्रवणे भावनायाः अप्रतीत्या च तस्या आख्यातवाच्यत्वलाभेन तस्या धातुवाच्यत्वस्वीकारे "अन्वयव्यतिरेकाभ्यां शब्दादर्थावगतिः" इति न्यायमूलक - " तदागमे हि तद्दृश्यते"[4] इति न्यायविरोधापत्तेश्च। अपि च चैत्रः तण्डुलं पचतीत्यादौ पचति इत्यस्य पाकं करोति इति विवरणमाध्यमेनाख्यातस्य व्यापारार्थकत्वमपहाय धात्वर्थत्वस्वीकारोपि वैयाकरणनामयुक्त एव। यतस्तस्याख्यातस्य व्यापारार्थविवरणबोधकत्वे एव तात्पर्यम्। अथ च मीमांसकमतानुसारं यजेत स्वर्गकामः इत्यादौ यजधात्वर्थस्य यागस्य करणत्वसम्बन्धेन अथवा स्वविषयकज्ञानविशेषजन्यानुमितिप्रयोज्यत्वसम्बन्धेन अथवा स्वविषयक ज्ञानविशेषजन्यानुमितिप्रयोज्यत्वसम्बन्धेन आख्यातार्थभावनायामेवान्वयस्यौचित्यात् सर्वविधस्यापि व्यापारस्याख्यातार्थबोध्यत्वस्वीकारौचित्यात्सर्वविधस्यापि व्यापारस्याख्यातार्थबोध्यत्वस्वीकारौचित्यात् चैत्रस्तण्डुलं पचति इत्यादी तत्तद्धात्वर्थ फलविशेषणकः तत्तदाख्यातार्थ व्यापारमुख्यविशेष्यकशाब्दबोधः प्रवोचितः । तथाच प्राचीनमीमांसकमतानुसारं चैत्रस्तण्डुलं पचति इत्यादौ एकत्वविशिष्ट चौत्रकर्तृकपाककरणिका पाकानुकूला भावनेत्येव शाब्दबोधोऽतिसमीचीनः इति वदन्ति ।

**प्राचीनमीमांसकमतनिराकरणपूर्वकं नव्यमीमांसकमतानुसारं धात्वाख्यातार्थविषयक - शाब्दबोधवर्णनम्**

वस्तुतस्तु फलमेव धात्वर्थः, सर्वोऽपि व्यापारः आख्यातार्थ एव न धात्वर्थः इति प्राचीनमीमांसकमतमाश्रित्य तन्मतानुसारं चौत्रस्तण्डुलं पचति, यजेत स्वर्गकाम इत्यादौ प्राचीनमीमांसकमतवासनया तन्मतानुसारं धात्वर्थविषयक शाब्दबोधवर्णनमत्यन्तमनुचितम्। शाब्दबोधवर्णनवेलायां प्राचीनमीमांसकमताश्रयणे तन्मतानुसारं धातोर्व्यापारावाचकत्वे चौत्रस्तण्डुलं पचतीत्यादौ विक्लित्यादिफलमेव पाकपदार्थः स्यात्। तथा सति "चैत्रः पचति" इत्यत्र पाकोऽरब्धः । विक्लित्त्यादिफलन्तु नोत्पन्नम् फुत्कारादिव्यापारा विद्यन्ते। तदा फलश्चयानुत्पन्नत्वेन पाको भवति इति प्रयोगानापत्तिः। फलस्य भविष्यत्वात् "पाको भविष्यति" इति प्रयोगापत्तिश्च । किञ्च व्यापारो नष्टः । फलमुत्पन्नस्य तदा फलस्य वर्तमानत्वात् पाको विद्यते इति प्रयोगापत्तिः । पाकोऽभूत् इति प्रयोगानापत्तिश्चा एवं फलमात्रस्य धात्वर्थत्वे गमेस्संयोगमात्रमर्थः । तदा गमनस्यापि संयोगरूपत्वेन "ग्रामस्संयोगवान्" इति वदबाधितार्थबोधकत्वेन ग्रामस्संयोगवानित्यर्थे "ग्रामो गमनवान्" इति प्रयोगापत्तिश्च । किञ्च गमेः संयोगमात्रार्थकत्वे ततो भावल्युडन्तस्यापि संयोगमात्रार्थकत्वेन उभयोरपि पर्यायिरूपत्वेन संयोगस्य गमनजन्यत्वाभावात् "गमनजन्यसंयोगाश्रयो ग्रामः" इति प्रयोगानापत्तेः । अपि च सर्वस्यापि व्यापारस्याख्यातार्थत्वस्वीकारे प्रत्ययार्थप्राधान्यबोधकप्रकृतिप्रत्ययौ सहैवार्थं ब्रूतस्तयोः प्रत्ययार्थस्यप्रधानमिति न्यायस्य प्रामाणिकत्वप्रदर्शनमपि प्राचीनमीमांसकानाम- त्यन्तमयुक्तम्। तस्य न्यायस्योत्सर्गिकत्वात् । अथ च तस्य न्यायस्य यः प्रधानं सः प्रत्ययार्थो यः प्रत्ययार्थस्य प्रधानमितिवा अर्थो न स्वीकार्यः । आद्ये अजा, अश्वेत्यादौ डाबादिवाच्यप्रत्ययार्थस्त्रीत्वस्य प्राधान्यापत्तेः । अजेत्यादौ स्त्रीत्वविशेष्यकबोधस्य कस्याप्यननुभवात् । तस्यैकत्वेन अजे, अजा इत्यादौ द्विवचनबहुवचनयोरनापत्तेश्च । छग्यादीनामप्रत्ययार्थत्वेन प्राधान्यानापत्तेश्च । तदागमे हि तद्दृश्यते इति न्यायः, करोतीति विवरणञ्च न मीमांसकमतसाधकम् । यतो हि पचतीत्यस्य पाकं करोतीति विवरणवत् किं कृतमित्युक्ते पक्वमिति विवरणदर्शनात् तत्राख्यातस्य अभावेऽपि कृञ्चा विवरणेन भावनाया: प्रतीतेस्तदागमन्यायस्य, विवरणस्य चातिव्याप्तेः । तिङन्तस्थले इव कृदन्तस्थलेऽपि भावनाया एव प्रत्ययवाच्यत्वमिति न युक्तम् । कृतामपि भावनावाचित्वे तिङन्तकृदन्तोभयसाधारण्येन भावनायाः प्रतीतेः कृत्प्रत्ययस्थलेऽपि भावनायाः प्राधान्यापत्तौ सत्त्वप्रधानानि नामानि इति स्मृतिविरोधः स्यात् । स्पष्टश्चेदं श्रीमता कौण्डभट्टेन वैयाकरणभूषणसारे ।[5]

**परमलघुमञ्जूषाग्रन्थकारमतानुसारमाख्यातार्थव्यापारमुख्यविशेष्यकाशाब्दबोधवादिप्राचीनमिमांसकमतनिराकरणम् -**

अयमत्र परमलघुमञ्जूषाग्रन्थाकारस्याशयः फलमात्रं धात्वर्थः, सर्वोऽपि व्यापार आख्यातार्थ एव न धात्वर्थ इति प्राचीनमीमांसकमतमत्यन्तमनुचितम् । तन्मतानुसारं सर्वविधव्यापारस्य प्रत्ययार्थत्वस्वीकारे पचतीत्यादौ बोधकतारूपां तिबादिशक्ति तत्स्थानित्वेन कल्पिते लकारे स्थानिवद्भावेन प्रकल्प्य लकाराणां कर्तृकर्माद्यर्थविधायकस्य लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रविरोधः प्राचीनमीमांसकानामपरिहार्य एव स्यात् । किञ्च फूत्कारादिव्यापाराणां प्रत्ययार्थत्वस्वीकारे तिङन्तकृदन्तोभयसाधारण्ये-

नानेकेषां लकाराणामाख्यातार्थत्वकल्पनापेक्षया लाधवादेकस्यैधातोर्व्यापारार्थबोधकत्वेलाघवात् पचतीत्यादितिङन्तस्थले, पकमित्यादिकृदन्तस्थले च सर्वविधव्यापारस्य धात्वर्थत्वबोधकत्वमेवोचितम् । किञ्च पचति, पक्ष्यति पक्ववानित्यादौ फूत्कारादिशारीरिकव्यापारस्य, कृतेश्च प्रत्ययार्थत्वस्वीकारे चैत्रः पचतीत्यत्र पचधातुसमभिव्याहारे गच्छतीति प्रतीतिवारणाय तथा चैत्रो गच्छतीत्यत्र गमधातुसमाभिव्याहारे चैत्रः पचतीति प्रतीतिवारणाय तत्तश्ब्दोधे विपरीतप्रतीतिवारणाय तत्तव्दोधे विपरीतप्रतीतिवारणाय तत्तव्दोधे तत्तद्धातुप्रत्ययसमभिव्याहारस्यापि कारणत्वकल्पने प्राचीनमीमांसकानामत्यन्तगौरवम् । किञ्च प्राचीनमीमांसकमतानुसारं सर्वविधव्यापारस्य प्रत्यबोधकत्वे स्वार्थव्यापारव्यधिकरणफलवाचकत्वस्य तथा फलसमानाधिकरणव्यापारवाचकत्वस्य च सकर्मकार्मकधातुचयेऽसम्भवात् पचादिसकर्मकधातूनां, शीङाद्यकर्मकधातूनाञ्च सकर्मकत्वाकर्मत्वव्यवहारः उच्छिद्येत। प्रत्ययार्थ व्यापारव्यधिकरणफलवाचकत्वमादायतथा-प्रत्यायर्थ फलसमानाधिकरणव्यापारवाचकत्वमादाय वा धातूनां सकर्मकत्वाकर्मकत्वविभाग-स्सिद्धान्तयितुं न्नैव शक्यते । तथा सति प्राचीनमीमांसकानां “सत्त्वप्रधानानि नामानि”[6] इति निरुक्तवचनस्य विरोध आपद्येत । किञ्च “गुरु: शिष्याभ्यां पाचयति इत्यादौ हेतुमति च”[7] इति सूत्रवलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापारः आख्यातार्थो वाच्यः। एवञ्च सङ्ख्यायाः स्ववाचकाख्यातार्थव्यापारेऽन्वयिन्येवान्वयात् शिष्याभ्यामित्यत्र शिष्यशब्दात् द्विवचनानापत्तिः । पाचयतीत्येकवचनापत्तिश्च । गुरोरनभिधानेन गुरुशब्दात् प्रथमायाः अनापत्तेश्च । शिष्यशब्दात् प्रथमाया आपत्तेश्च । अतः फलमेव धात्वर्थः सर्वोऽपि व्यापार आख्यातार्थ एवेति प्राचीनमीमांसकमतं, तन्मतमाध्यमेन चैत्रो गच्छति, यजेत स्वर्गकामः इत्यादौ प्रत्ययार्थव्यापारमुख्यविशेष्यकशाब्दबोधवर्णनच प्राचीनमीमांसकदुर्दुरूटानामत्यन्तं दुष्टमेव। प्रपञ्चितश्चैतद्वैयाकरणनागेशेन स्वप्रणीतायां परमलघुमञ्जूषायाम् ।

**नव्यनैयायिकमतरीत्या धात्वख्यातार्थविषयकशाब्दबोधवर्णनम् -**

नैयायिकास्तु चैत्रस्तण्डुलं पचति इत्यादौकर्तरि लकारे पचति इत्यादौ कृतिरूपभावनाया एव वाच्यत्वन्न तुव्यापाररूपायाः भावनायाः, तथा च चौत्रस्तण्डुलं पचतीत्यादौ कर्तरि लकारे कृतिरेव वाच्या, न व्यापारः । सर्वेषां फूत्कारादिव्यापाराणां कृतेरेकत्वात् तन्निष्ठकृतित्वस्याप्ये-कत्वाल्लाघवात् कृतित्वमेव शक्यतावच्छेदकंस्वीकार्यम् । व्यापाररूपभावनायाः वाच्यत्वे चैत्रस्तण्डुलं पचतीत्यादौ नैकेषां फूत्कारत्वादीनां शक्यतावच्छेदकत्वकल्पने वैयाकरणानां गौरवापत्त्या लाघवात् कृतित्वमेवशक्यतावचछेदकत्वं युक्तम् । अपि च पचतीत्यादौ कृतेरेव वाच्यत्वे कृतिरशक्या तस्यां विद्यमानं कृतित्वं शक्यतावच्छेदकं भवति । व्यापारस्य वाच्यत्वे तदाश्रयः कर्ता शक्यः । तन्निष्ठाकृतिरशक्यतावच्छेदिका । तस्यां विद्यमानं कृतित्वं शक्यतावच्छेदकं भवति । तथा च वैयाकरणानां मते यच्छक्यतावच्छेदकतावच्छेदकं कृतित्वं तदस्मन्नैयायिकानां मते शक्यतावच्छेदकमेव भवति अतोऽत्रावच्छेदकलाघवमादाय चौत्रस्तण्डुलं पचतीत्यादौ कर्त्तरिलकारस्थले अवच्छेदकलाघवमादाय कृतिरूपभावनाया एव वाच्यत्वमुचितन्न तु व्यापाररूपभावनायाः । न च चौत्रस्तण्डुलं पचतीत्यादौ कर्तरि लकारेकृतेरेव वाच्यत्वे रथो गच्छतीत्यादावचनेन रथादौ चेतनारूपायाः कृतेर्बाधितत्वात् तत्र गमनानुकूल पूर्वदेशविभागानुकूलोत्तरदेशसंयोगानुकूल व्यापारानुकूलकृत्याश्रयाभिन्नो रथः इत्याकारकः शाब्दबोधो नोत्पद्येतेतिवाच्यम् । रथो गच्छतीत्यादावपि लाघवात् कृतेरेव वाच्यत्वे स्वीकृतेऽपि लक्षणया तत्र व्यापारत्वप्रकारकबोधमाश्रित्यैकत्वविशिष्टरथकर्तृक पूर्व देशविभागानुकूलोत्तरदे शसंयोगानुकूलोव्यापारइत्याकारकशाब्दबोधस्वीकारेणादोषात्। एवञ्च चौत्रस्तण्डुलं पचति इत्यादौ कर्त्तरि लकारस्थले लाघवात् कृतिरेव वाच्या, नतु व्यापारः। तथा च चैत्रस्तण्डुलं पचतीत्यत्र पाकानुकूलव्यापारानुकूलकृत्याश्रयाभिन्नश्चैत्र इति शाब्दबोध एवोचितः । चैत्रेण रच्यते तण्डुलः इत्यादौ कर्मणि लकारस्थले तु तण्डुलाभिन्नसमवेतविक्लित्तिरूपफलज नकव्यापारजन्यफलाश्रयाभिन्नस्तण्डुलः इति शाब्दबोधो भवति । चैत्रस्य पाकः इत्यादौ भावलकारस्थले अनुभवबलात् धात्वर्थव्यापारमुख्य विशेष्यकशाब्दबोध एव स्वीकार्यः। तथाच चैत्रस्य पाक इत्यादौ भावलकारस्थले वैयाकरणानामिव कर्त्तृप्रत्ययसमभिव्याहारे एकत्वविशिष्टचौत्राभिन्नकर्तृकत-ण्डुलाभिन्नकर्मकविक्लित्यनुकूलवर्तमानकालावाच्छिन्नो व्यापारः इति शाब्दबोधस्तत्र फलति । अतः चौत्रस्तण्डुलं पचति इत्यादौ कर्तरि लकारे प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोध एव मूर्धन्यतया स्वीकार्यो, नतु धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधः । प्रपञ्चितश्चैतत् श्रीमता कौण्डभट्टेन स्वप्रणीते वैयाकरणभूषणसारे।[8]

**परमलघुमञ्जूषाग्रन्थोक्तदिशा नैयायिकभणितधात्वाख्यातार्थविषयकशाब्दबोधवर्णनम्**

एवं स्थिते वैयाकरणनागेशेन स्वप्रणीते परमलघुमञ्जूषाग्रन्थे धात्वर्थनिरूपणो तार्किकोक्तशाब्दबोधसिद्धान्तः इत्यमभाणि । चैत्रस्तण्डुलं पचति इत्यादौ कर्त्तरि लकारस्थले फलं, तदनुकूलः फूत्कारादिशारीरिकव्यापारश्च धात्वर्थः । लकाराणां कृतावेव शक्तिः लाघवान्नतु कर्तरि । कर्तरि लकारस्य शक्तिस्वीकारे कर्तृभेदेन शक्यतावच्छेदिका कृतिभिन्नभिन्ना भवतीति शक्यतावच्छेदक धर्मांणामानन्त्येनोपस्थितिकृतगौरवं वैयाकरणानामनिवार्यं स्यात् । कर्तुर्लकारावाच्यत्वेऽपि प्रथमान्तपदेनैव कर्तुर्लाभात् । आख्यातार्थे कृतिरूपे धात्वर्थद्वयस्य फलशारीरव्यापाररूपस्यानुकूलत्वसम्बन्धेन जन्यत्वसम्बन्धेन चान्वयः । एवञ्चानुकूल- त्वजन्यत्वान्यतरसम्बन्धावच्छिन्नप्रकृतधात्वर्थनिष्ठव्यापारत्वावचछिन्नप्रकारतानिरूपित- विशेष्यत्वसम्बन्धावच्छिन्नशाब्दबुद्धित्वावच्छिन्नं प्रति क्रमशः कृतित्वफलत्वान्यतर- धर्मावच्छिन्नविशेष्यतासम्बन्धेन लकारजन्यो-

पस्थितिः कारणमित्याकारकः कार्यकारणभावः फलति । यत्र कर्तृप्रत्ययस्तत्रानुकूलत्वसम्बन्धावाच्छिन्ना प्रकारता कृतित्वावच्छिन्ना च विशेष्यता। यत्र कर्मप्रत्ययस्तत्र जन्यत्वसम्बन्धावाच्छिन्ना प्रकारता, फलत्वावच्छिन्ना च विशेष्यतेति भेदः। धात्वाख्यातार्थयोर्मध्येऽनुकूलत्वमाख्यातार्थप्रथमान्तार्थयोर्मध्ये चाश्रयत्वं संसर्गः । संख्याकालातिरिक्त एवाख्यातार्थोऽत्र प्रथमान्तार्थे विशेषणं भवति। तथा च तत्राश्रयत्वसम्बन्धावच्छिन्नल कारार्थकृतिफलान्यतरनिष्ठप्रका रतानिरूपितविशेष्यतासम्बन्धेन जायमानशाब्दबुद्धित्वावच्छिन्नं प्रति तिङन्तपदसमाभिव्याह्यतप्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावः फलति। रथो गच्छति इत्यादावचेतने रथादौ कृतेर्बाधितत्वेऽपि यत्नशून्यत्वेन व्यापारे, आश्रयत्वे वा आख्यातस्य लक्षणास्वीकारान्न दोष। एवञ्च चैत्रस्तण्डुलं पचतीत्यादौ कर्तरि लकारस्थले कृतेराख्यातार्थत्वविधानद्वारा प्रथमान्तार्थमुख्यविशेष्य-कशाब्दबोध एव मूर्धन्यतया स्वीकार्यो, नतु धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोध इति नैयायकानां चरमसिद्धान्तः ।

**वैयाकरणभूषणसारपल मलघुमञ्जूषाग्रन्थद्वयदिशा पूर्वोक्तनैयायिकमतनिराकरणम्-**

वस्तुतस्तु पूर्वोक्तनैयायिकमतरीत्या पचतीत्यादौ कृतेरेवाख्यातवाच्यत्वे पचतीत्यस्य पाकानुकूला कृतिः, पाकानुकूला भावना, पाकानुकूलोत्पादनेति विवरणवत् पाकानुकूलो व्यापारः, पाकानुकूला क्रियेत्यादिविवरणदर्शनात् विवरणे व्यापारस्य, कृतेश्चभानाद्विवरणविव्रियमाणयोस्समानार्थकत्वनियमाद्विव्रियमाणोऽपि व्यापारस्य भानमावश्यकम्। अन्यथा विवरणस्य शक्तिग्राहकत्वं वृद्धोक्तं भज्येत । एवञ्च निरुक्तविवरणबलाद्व्यापारस्य-कृत्यादेश्च अवश्यं पचतीत्यादौ वाच्यत्वलाभात् "पचतीत्यादौ कृतिरेव वाच्या, न व्यापार इति नैयायिकोक्तं नादरणीयमेव । कृतेर्वात्यत्वे नास्माकं विप्रपिपत्तिः । किन्तु तन्मात्रवाचित्वे एव विप्रतिपत्तिः । रथो गच्छति इत्यादावपि लक्षणया आख्यातस्य व्यापारत्वप्रकारकबोध इति" नौयायिकोक्तमप्यनुचितमेव । नैयायिकानां तत्रापि लक्ष्यतावच्छेदक गौरवस्य सत्त्वात् । शक्यतावच्छेदकत्वलक्ष्यतावच्छेदकत्वयोर्वैषम्ये बीजाभावात् । न च पचतीत्यस्य पाकं करोतीति विवरणदर्शनात् तद्विवरणस्य यत्नार्थकत्वाच्च यत्न एव वाच्यो न व्यापार इति वाच्यम्। अचेतने रथादौ यत्नस्यबाधितत्वेन कृञो न यत्नमात्रार्थकत्वम् । रथो गच्छतीत्यत्र रथो गमनं करोतीति विवरणदर्शनाच्च नैयायिकोक्तं कृञो यत्नमात्रार्थकत्वमनुचितम् । अपि च नैयायिकमतानुसारं चैत्रस्तण्डुलं पचतीत्यादौ प्रौढ्या कृतेरेव वाच्यत्वे, व्यापारस्य चावाच्यत्वे पश्य मृगो धावतीत्यादौ भाष्यसिद्धपदैकवाक्यता न स्यात् । तथाहि पचतीत्यादौ प्रत्ययार्थविशेषकबोधस्वीकारे "पश्य मृगो धावतीत्यत्र धावनक्रियायाः आश्रयत्वसम्बन्धेन मृगेऽन्वयः।" दर्शनानुकूलक्रियायाः आश्रयत्वसम्बन्धेन युष्मदर्थेऽन्वयः । तथाच धावनक्रियायाश्रयाभिन्नो मृगः, दर्शनानुकूलक्रियाश्रयाभिन्नस्त्वमिति पार्थक्येन बोधः स्वीकार्यः । तथा च क्रिययोः परस्परमन्वयस्यालाभेन भाष्यसम्मतपदैकवाक्यता न सिद्ध्येत् । धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधवादिवैयाकरणमते तु "पश्य मृगो धावति" इत्यत्र एकमृगाभिन्नाश्रयिका या वर्तमाना धावनक्रिया तत्कर्मकं यदिष्टसाधनीभूतं दर्शनं तदनुकूला त्वत्कर्तृका क्रियेतिरीत्या भाष्यसिद्धपदैकवाक्यता सिद्ध्यति । प्रथमान्तार्थमुख्यविशेष्य- कशाब्दबोधवादिमते पश्य मृगो धावतीत्यत्र विशेष्यस्य मृगादेः कारकत्वेन गुणभूतायामपि दर्शनक्रियायामन्वयस्य वाच्यतया दृशिफलाश्रयत्वेन तस्य कर्मत्वात् ततः प्रथमाबाधनेन द्वितीयाप्रवृत्तेरनिवार्यत्वेन पश्य मृगो धावतीत्यर्थे पश्य मृगं धावतीति प्रयोगापत्तिः । ननु यत्तच्छब्दमृगो धावतीत्यर्थे पश्य मृगं धावतीति प्रयोगापत्तिः । ननु यत्तच्छब्दयोरध्याहारेण यो धावति मृगस्तं पश्येत्यर्थाश्रयणा मृगपदोत्तरं न द्वितीयापत्तिरिरिति, यो धावति मृगस्तं पश्य इति वाक्यद्वयापत्तेः । अपि च पश्य मृगोधावतीत्यत्र तमिति द्वितीयान्तपदाध्याहारद्वारा वाक्यभेदेनान्वयोऽप्ययुक्तः । न हि शाब्दमशाब्देनान्वेति इति न्यायात् । एवञ्च पश्य मृगो धावतीत्यादौ भाष्यसंमतपदैकवाक्यतान्वयानुपपत्ति तादवस्थ्यसाम्यात् चौत्रस्त-ण्डुलं पचतीत्यादौ नैयायिकोक्तप्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो दुष्ट एवा प्रपञ्चितं चैतत् श्रीमत्कौण्डभट्टेन स्वप्रणीते वैयाकरणभूषणसारे ।

**परमलघुमञ्जूषाग्रन्थोक्तदिशा नव्यनैयायिकभणितधात्वाख्यातार्थविषयकशाब्दबोधनिराकरणम्-**

एवं स्थिते परमलघुमञ्जूषाग्रन्थमुखेन वैयाकरणो नागेशः तार्किकोक्तप्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधनिराकरणपूर्वकं पचतीत्यादौ कर्तरि लकारस्थले कर्तृप्रत्ययसमभिव्याहारे तत्तद्धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधसिद्धान्तं पाणिनीये मुनित्रयसम्मतं साङ्गोपाङ्गं जग्रन्थ । तथाहि - चौत्रस्तण्डुलं पचतीत्यादौ कर्तरि लकारस्थले विक्लित्यनुकूलव्यापारानुकूलकृत्याश्रयाभिन्नश्चैत्र इत्याकारकप्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधप्रतिपादको नैयायकसिद्धान्तस्सुतरामनुचितः । तथापि प्रौढया तत्सिद्धान्तस्वीकारे युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इति पचतीत्यादौ सूत्रस्थसमानाधिकरणपदस्वारस्यात् स्वलकारवाच्यकारकवाचित्वरूपसामानाधिकरणस्य तार्किकमते तिबादीनामिव कृदादीनामपि कृतिमात्रवाचकत्वापत्तौ लादेशाविशेषणकृत्प्रत्ययेभ्योऽपि कृतिमात्रबोधापत्तेश्च। न च तिङादीनामिव कृदादीनामपि कृतिमात्रवाचकत्वमस्तु । तादृशकृतेराश्रयत्वसम्बन्धेन प्रथमान्तार्थेऽन्वयात् पचन्तं चैत्रं पश्य इत्यादौ विक्लित्यनुकूलव्यापारा नुकूलकृतिमच्चैत्रकर्मकद- र्शनानुकूलव्यापारानुकूलकृत्याश्रयाभिन्नो देवदत्त इति बोधस्वीकारे दोषाभावादिति वाच्यम्। तथा सति नौयायिकानां

समानाधिकरणनामार्थयोः भेदेन साक्षादन्वयोऽव्युत्पन्नः इति व्युत्पत्तिभङ्गापत्तेः ।

अत्र पुनः पूर्वपक्षः - समानाधिकरणनामार्थयोः भेदेन साक्षादन्वयोऽव्युत्पन्नः इति व्युत्पत्तिबलात् कृदन्तस्थले आख्यातस्य कर्त्रादिष्वेवशक्तिः । कृदन्ते आख्यातस्य कर्त्रादिषु शक्त्यनङ्गीकारे समानाधिकरणनामार्थयोरभेदान्वयः इति व्युत्पत्तिभङ्गापत्तेः । अतस्तिङन्तस्थले आख्यातस्य कृतौ, कृदन्तस्थले कर्तृकर्मादिषु शक्तिरिति विषयव्यवस्था सूपपादेति ।

अत्रेदं समाधानम् - नैयायिकम्मन्यैः समानाधिकरण नामार्थयोरभेदान्वय इतिव्युत्पत्तिमाध्यमेनाख्यातस्य कृदन्ते कर्तरि शक्तिस्वीकारे "पचतिकल्पं देवदत्तः" "पचतिरूपं देवदत्तः" इत्यादितद्धितस्थलेषु तिङा कर्तृवाचकत्वानापत्तेः किञ्चाख्यातस्य तिङन्तस्थले कृतिवाचकत्वे रथो गच्छतीत्यादावचेतने रथादौ कृतेरभावेनाख्यातस्य व्यापारे लक्षणाश्रयणरूपं गौरवं नैयायिकानामपरिहार्यमेव तिङन्तस्थले आख्यातस्य कृतौ शक्तिस्वीकारे कर्तृकर्मादीनामनभिहिते द्वितीयादयः, तेषामभिधाने प्रथमेत्याभिधानानभिधानव्यवस्थाया उच्छेदापत्तेः । किञ्च "स्थालीस्थे यत्ने पाचिना कथ्यमाने स्थाली स्वतन्त्रा" इति कारके इति सूत्रस्थभाष्यप्रामाण्यानुरोधेन यत्नरूपव्यापारस्यापि धातुवाच्यत्वलाभात् तिङन्तस्थले कृतेराख्यातार्थत्वं सम्भावयितुमेव न शक्यते। अन्यथा तत्र व्यापारस्याख्याताभिन्नधातुनैव-लभ्यत्वेनान्यलभ्यत्वात् अनन्यलभ्यः शब्दार्थः इति न्यायविरोधापत्तेस्तथा कारके इति सूत्रस्थभाष्यविरोधापत्तेश्च । अतस्तिङन्तस्थले पचतीत्यादावपि पाचक इत्यादिकृदन्तस्थले इव कर्त्तर्वाख्यातार्थो व कृतिः । तथैव तिङन्तकृदन्तस्थलन्वयेऽपि पचति पाचकः इत्यादौ फूत्कारादिशरीरव्यापारो, यत्नश्चेत्युभयमपि धात्वर्थ एवेति वैयाकरणानां चरमसिद्धान्तः। प्रपञ्चितञ्चैतत् वैयाकरणनागेशेन परमलघुमञ्जूषायाम् ।

**समीक्षा -**

एतावता प्रबन्धेन प्राचीननवीन मीमांसकनैयायिकमतनिराकरणपूर्वकमनेकप्रबन्धूप्रबन्ध- प्रदर्शनपूर्वकं तिङन्तकृदन्तस्थलेद्वयेऽपि फूत्कारादिशरीरव्यापारस्य, कृतेश्च धात्वर्थत्वं कर्तृकर्मणोराख्यातार्थत्वञ्च वैयाकरणमूर्धन्यैः प्रत्यष्ठापि । तत्प्रसङ्गे नैकप्रमाणप्रदर्शनपुस्सरं प्राचीननवीननैयायिकमीमांसकमतनि नागेशादिवैयाकरणपारदर्शिभिर्निराकारिषता तावन्मात्रेण प्राचीननवीननैयायिकमीमांसकमतान्यवच्चेदकावच्छेदेनाप्रामामिकानि, दुष्टानीति वा नैव मन्तव्यम्। सर्वेऽपि दार्शनिकास्ततच्छास्त्रस्तस्त्रीयग्रन्थेषु स्वस्वशास्त्रीयसिद्धान्तान् स्वस्वशैल्या प्रतिष्ठापयाम्बभूवुः । तत्र व्याकरणसिद्धान्त एव केनापि ग्रन्थकारेण, शास्त्रज्ञेन वा नैव निर्णयोविधातव्यः । सर्वाणि व्याकरणन्यायमीमांसादीनिदर्शनानि स्वस्वस्वाध्यायतपोमाध्यमेन तत्तदृषिभिर्मुनिभिश्च प्रण्यनायिषता वादिनो दौर्बल्यं, नतु वादस्य इति परमपूतार्षव्यवहारमनुसृत्य सर्वेषु शास्त्रेष्वस्माकं प्रामाण्यबुद्धिरेवास्थेया। तथापि अहं वैयाकरण इति मत्वा व्याकरणशास्त्री यवासनया धात्वाख्यातार्थविषयकमुख्यसिद्धान्तनिरूपणावसरे व्याकरणशास्त्रमतानुसारं नैकग्रन्थप्रमाणप्रदर्शनमुखेन पाणिनीयधात्वाख्यातार्थविषयक-श्शाब्दबोधं यथाशक्ति यथामत्यत्र मदीयप्रस्तुतशोधपत्रे साङ्गोपाङ्ग व्यवृण्वम् । अत्र युक्तमुत्पश्यन्तु भवन्तो महान्त इत्यलं पल्लवतल्लजकल्पानल्पजल्पनेनेति दिक् ।।

**सहायक ग्रन्थसूची –**


१. वैयाकरणभूषणसारः (तत्त्वबोधिनीव्याख्यासहितः) प्रथमप्रकरणम् - धात्वर्थनिर्णयः कौण्डभट्टः, वाराणासेय संस्कृतविश्वविद्यालयः, वाराणासी, १९८९ ।

२. परमलघुमञ्जूषा (भावप्रकाशिका - बालबोधिनी संस्कृतहिन्दी व्याख्ताद्वयोपेता) सप्तमप्रकरणम् - धात्वर्थनिरूपणम्, नागेशभट्टः, चौखम्बासंस्कृतप्रतिष्ठान, वाराणसी, १९९०।

३. निरुक्तम् - प्रथमाध्यायः - प्रथमपादः - वचनसङ्ख्या - २ (निरुक्तम् १.१.२), यास्काचार्यः, चौखम्बासंस्कृतसीरीज्, वाराणसी, १९९२

४. अष्टाध्यायी - पाणिनिः, दिल्लीसंस्कृतअकादमी, दिल्ली, १९९३। २

५. शक्तिवादः - प्रथमाध्यायः - प्रथमप्रकरणम्, गदाधरभट्टाचार्यः, चौखम्बासंस्कृतसीरीज्, वाराणसी, १९८२ ।

६. व्याकरणमहाभाष्यम् (प्रदीपोद्योतव्याख्यानद्वयोपेतम्) प्रथमाध्यायः - चतुर्थपादः - सूत्रसंख्या - चौखम्बासंस्कृतप्रतिष्ठान, वाराणसी, १९८२


**पादटिप्पणी –**

1. वै.भू.सा- कारिका १
2. वै.भू.सा- पृ ७५
3. वै.भू.सा- पृ १५७
4. वै.भू.सा- पृ १५७
5. वै.भू.सा- पृ १५७ तः १६९
6. निरुक्त- प्रथमोऽध्यायः, प्रथमपादः
7. पा.सू-३/१/३६
8. शक्तिवादः – प्रथमोऽध्यायः